# A-II/4/1338/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## साहित्यम्

समयः घण्टात्रयम् — पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. महिमभट्टः मङ्गलाचरणे कां प्रणमति ?

   **अथवा**

   सर्वस्यैव ध्वनेरन्तर्भावः कुत्र भवति ?

2. सर्वो हि शाब्दव्यवहारः कथमनुमानरूपः ?

3. किमाख्यातम् ?

   **अथवा**

   के कर्मप्रवचनीयाः ?

4. घटः कथं घटो भवति ?

5. शिशिरकालमपास्येति पद्यं कस्योदाहरणम् ?

   **अथवा**

   अर्थः कतिविधः ? नामानि लिखत।

6. प्रमाणत्रये वेदग्रहणं किमर्थम् ?

7. कः काव्यार्थः उच्यते ?

   **अथवा**

   कः अनुमेयः ?

8. के प्रादयः ?

9. को विभावः ?

   **अथवा**

   जात्यादयः के ?

10. भिन्नकर्तृकत्वभ्रमः कदा भवति ?

11. मुख्यवृत्त्या अर्थः कतिविधः ? नामानि लिखत।

12. किमध्यात्मप्रमाणम् ? तस्य किमुदाहरणम् ?

13. गुणीभूतव्यंग्यकाव्ये कस्यार्थस्य प्राधान्यम् ?

14. कः हृदयदर्पणस्य कर्त्ता ?

15. किं काव्यानुमितिः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. ध्वनिलक्षणे शब्दः पुनरनुपादेय एव – तत्कथमिति महिमभट्टदिशा विमृशत।

**अथवा**

केचित् पुनरेषां क्रियैवैका प्रवृत्तिनिमित्तमिति क्रियाशब्दत्वमेव सर्वेषां नामपदानामुपगच्छन्तीति विवेचयत।

17. वेदप्रमाणं सोदाहरणं प्रतिपादयत।

**अथवा**

कः अर्थः सहृदयश्लाघ्य इति पद्यं महिमभट्टदिशा व्याख्यात।

18. वाक्यार्थविषयकः साध्यसाधनभावो महिमभट्टदिशा विचारयत।

**अथवा**

भ्रान्तिरपि सम्भवतः प्रमा – इति कथमुक्तम्।

19. रसादयः कथमनुमानस्य विषयभूताः –विचारयत।

20. ध्वनिलक्षणे 'तमर्थमि'त्यत्र तदः पुंस्त्वं महिमभट्टदिशा प्रतिपादयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** (1×20=20)

21. ध्वनिलक्षणे महिमभट्टप्रतिपादितान् दशदोषान् निरूपयत।

**अथवा**

साहित्ये व्यक्तिविवेककर्त्तुः महिमभट्टस्य योगदानं विमृशत।